

# श्री सूक्तम्-ॐ ॥ हिरण्यवर्णां हरिणीं

https://www.chalisa.online

|| श्री सूक्तम् ||

ॐ ॥ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजां ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विंदेयं गामश्वं पुरुषानहम् ॥
अश्वपूर्वां रथमध्यां हस्तिनाद-प्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवीर्जुषताम् ॥
कांसोस्मि तां हिरण्यप्राकारामार्द्रां ज्वलंतीं तृप्तां तर्पयंतीम् ।
पद्मे स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥
चंद्रां प्रभासां यशसा ज्वलंतीं श्रियं लोके देवजुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥
आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्या अलक्ष्मीः ॥
उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥
क्षुत्पिपासामलां ज्येष्ठामलक्षीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुद मे गृहात् ॥
गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीगं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
श्रीर्मे भजतु । अलक्षीर्मे नश्यतु ।
मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनागं रूपमन्यस्य मयि श्रीः श्रयतां यशः ॥
कर्दमेन प्रजाभूता मयि सम्भव कर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥
आपः सृजन्तु स्निग्धानि चिक्लीत वस मे गृहे ।
नि च देवीं मातरं श्रियं वासय मे कुले ॥
आर्द्रां पुष्करिणीं पुष्टिं पिंगलाम् पद्ममालिनीम् ।
चंद्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
आर्द्रां यः करिणीं यष्टिं सुवर्णाम् हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥
तां म आवह जातवेदो लक्षीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावो दास्योऽश्वान्, विंदेयं पुरुषानहम् ॥
यश्शुचिः प्रयतो भूत्वा जुहुया-दाज्य-मन्वहम् ।
श्रियः पंचदशर्चं च श्रीकामस्सततं जपेत् ॥
आनन्दः कर्दमश्चैव चिक्लीत इति विश्रुताः ।
ऋषयस्ते त्रयः पुत्राः स्वयं श्रीरेव देवता ॥
पद्मानने पद्म ऊरू पद्माक्षी पद्मसंभवे ।
त्वं मां भजस्व पद्माक्षी येन सौख्यं लभाम्यहम् ॥
अश्वदायी च गोदायी धनदायी महाधने ।
धनं मे जुषतां देवीं सर्वकामार्थ सिद्धये ॥
पुत्रपौत्र धनं धान्यं हस्त्यश्वाजाविगो रथम् ।
प्रजानां भवसि माता आयुष्मन्तं करोतु माम् ॥
चन्द्राभां लक्ष्मीमीशानां सूर्याभां श्रियमीश्वरीम् ।
चन्द्र सूर्याग्नि सर्वाभां श्री महालक्ष्मी-मुपास्महे ॥
धन-मग्नि-र्धनं वायु-र्धनं सूर्यो धनं वसुः ।
धनमिन्द्रो बृहस्पति-र्वरुणं धनमश्नुते ॥
वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनी ॥
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः ।
भवन्ति कृत पुण्यानां भक्तानां श्री सूक्तं जपेत्सदा ॥
वर्षंतु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहंतु सर्वबीजान्यव ब्रह्म द्विषो जहि ॥
पद्मप्रिये पद्मिनि पद्महस्ते पद्मालये पद्म-दलायताक्षी ।
विश्वप्रिये विष्णु मनोनुकूले त्वत्पादपद्मं मयि सन्निधत्स्व ॥
या सा पद्मासनस्था विपुलकटितटी पद्मपत्रायताक्षी ।
गम्भीरा वर्तनाभिः स्तनभरनमिता शुभ्र वस्तोत्तरीया ॥
लक्ष्मी-र्दिव्यै-र्गजेन्द्रै-र्मणिगण खचितै-स्स्नापिता हेमकुम्भैः ।
नित्यं सा पद्महस्ता मम वसतु गृहे सर्व माङ्गल्ययुक्ता ॥
लक्ष्मीं क्षीर समुद्र राजतनयां श्रीरङ्ग धामेश्वरीम् ।
दासीभूत समस्त देव वनितां लोकैक दीपाङ्कुरां ।
श्रीमन्मन्द कटाक्ष लब्ध विभव ब्रह्मेन्द्र गङ्गाधरां ।
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियां ॥
सिद्धलक्ष्मी-र्मोक्षलक्ष्मी-र्जयलक्ष्मी-स्सरस्वती ।
श्रीलक्ष्मी-र्वरलक्ष्मीश्च प्रसन्ना मम सर्वदा ॥
वराङ्कुशौ पाशमभीति मुद्रां ।
करैर्वहन्तीं कमलासनस्थाम् ।
बालर्ककोटि प्रतिभां त्रिनेत्रां ।
भजेऽहमम्बां जगदीश्वरीं ताम् ॥
सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके देवी नारायणि नमोस्तुते ॥
ॐ महादेव्यै च विद्महे विष्णुपत्नी च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ॥
श्री-र्वर्चस्व-मायुष्य-मारोग्य-मावीधात् पवमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं शतसंवत्सरं दीर्घमायुः ॥
ॐ शान्तिः शान्तिः शान्तिः ॥

|| https://www.chalisa.online ||